श्री यंत्रोधारक हनुमत् (प्राणदेवर) स्तोत्रं

श्री यंत्रोधारक हनुमत् (प्राणदेवर) स्तोत्रं

नमामि दूतं रामस्य सुखदं च सुरद्रुमं |
श्री मारुतात्मसंभूतं विद्युत्कांचन सन्निभं || 1

पीनवृत्तं महाबाहुं सर्वशत्रुनिवारणं |
रामप्रियतमं देवं भक्ताभीष्टप्रदायकं || 2

नानारत्नसमायुक्तं कुंडलादिविराजितं |
द्वात्रिंशल्लक्षणोपेतं स्वर्णपीठविराजितं || 3

त्रिंशत्कोटिबीजसंयुक्तं द्वादशावर्ति प्रतिष्ठितं |
पद्मासनस्थितं देवं षट्कोणमंडलमध्यगं || 4

चतुर्भुजं महाकायं सर्ववैष्णवशेखरं |
गदाऽभयकरं हस्तौ हृदिस्थो सुकृतांजलिं || 5

हंसमंत्र प्रवक्तारं सर्वजीवनियामकं |
प्रभंजनशब्दवाच्येण सर्वदुर्मतभंजकं || 6

सर्वदाऽभीष्टदातारं सतां वै दृढमहवे |
अंजनागर्भसंभूतं सर्वशास्त्रविशारदं || 7

कपीनां प्राणदातारं सीतान्वेषणतत्परं |
अक्षादिप्राणहंतारं लंकादहनतत्परं || 8

लक्ष्मणप्राणदातारं सर्ववानरयूथपं |
किंकराः सर्वदेवाद्याः जानकीनाथस्य किंकरं || 9

वासिनं चक्रतीर्थस्य दक्षिणस्थ गिरौ सदा |
तुंगांभोदि तरंगस्य वातेन परिशोभिते || 10

नानादेशगतैः सद्भिः सेव्यमानं नृपोत्तमैः |
धूपदीपादि नैवेद्यैः पंचखाद्यैश्च शक्तितः || 11

भजामि श्रीहनूमंतं हेमकांतिसमप्रभं |
व्यासतीर्थयतींद्रेण पूजितं च विधानतः || 12

त्रिवारं यः पठेन्नित्यं स्तोत्रं भक्त्या द्विजोत्तमः |
वांछितं लभतेऽभीष्टं षण्मासाभ्यंतरे खलु || 13

पुत्रार्थी लभते पुत्रं यशोऽर्थी लभते यशः |
विद्यार्थी लभते विद्यां धनार्थी लभते धनं || 14

सर्वथा माऽस्तु संदेहो हरिः साक्षी जगत्पतिः |
यः करोत्यत्र संदेहं स याति नरकं ध्रुवं || 15

यंत्रोधारकस्तोत्रं षोडशश्लोकसंयुतं |
श्रवणं कीर्तनं वा सर्वपापैः प्रमुच्यते || 16

इति श्री व्यासराजकृत यंत्रोधारक हनुमत् स्तोत्रं ||